श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनरसिंहपुराणे

# ॥ श्री नृसिंहावतारम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंहावतारम् ॥

मार्कण्डेय उवाच

अथागतं ते प्रह्लादं दृष्ट्वा दैत्याः सुविस्मिताः।
शशंसुर्दैत्यपतये यैः क्षिप्तः स महार्णवे॥ 1 ॥

स्वस्थं तमागतं श्रुत्वा दैत्यराड्विस्मयाकुलः।
आहूयतां च इत्याह क्रोधान्मृत्युवशे स्थितः॥ 2 ॥

तथासुरैर्दुरानीतः समासीनं स दिव्यदृक्।
आसन्नमृत्युं दैत्येन्द्रं ददर्शात्यूर्जितश्रियम्॥ 3 ॥

नीलांशुमिश्रमाणिक्यद्युतिच्छन्नविभूषणम्।
सधूमाग्निमिव व्याप्तमुच्चासनचितिस्थितम्॥ 4 ॥

दंष्ट्रोत्कटैर्घोरतरैर्घनच्छविभिरुद्भटैः।
कुमार्गदर्शिभिर्दैत्यैर्यमदूतैरिवावृतम्॥ 5 ॥

दूरात् प्रणम्य पितरं प्राञ्जलिस्तु व्यवस्थितः।
अथाहाकारणक्रोधः स खलो भर्त्सयन् सुतम्॥ 6 ॥

भगवत्प्रियमत्युच्चैर्मृत्युमेवाश्रयन्निव।
मूढ रे शृणु मद्वाक्यमेतदेवान्तिमं ध्रुवम्॥ 7 ॥

इतो न त्वां प्रवक्ष्यामि श्रुत्वा कुरु यथेप्सितम्।
उक्त्वेति द्रूतमाकृष्य चन्द्रहासासिमद्भुतम्॥ 8 ॥

सम्भ्रमाद्वीक्षितः सर्वैश्चालयन्नाह तं पुनः.।
क्व चास्ति मूढ ते विष्णुः स त्वामद्य प्ररक्षतु॥ **9**॥

त्वयोक्तं स हि सर्वत्र कस्मात्स्तम्भे न दृश्यते।
यदि पश्यामि तं विष्णुमधुना स्तम्भमध्यगम्॥ **10**॥

तर्हि त्वां न वधिष्यामि भविष्यसि द्विधान्यथा।
प्रह्लादोऽपि तथा दृष्ट्वा दध्यौ तं परमेश्वरम्॥ **11**॥

पुरोक्तं तद्वचः स्मृत्वा प्रणनाम कृताञ्जलिः।
तावत्प्रस्फुटितस्तम्भो वीक्षितो दैत्यसूनुना॥ **12**॥

आदर्शरूपौ दैत्यस्य खड्गतो यः प्रतिष्ठितः।
तन्मध्ये दृश्यते रूपं बहुयोजनमायतम्॥ **13**॥

अतिरौद्रं महाकायं दानवानां भयङ्करम्।
महानेत्रं महावक्त्रं महादंष्ट्रं महाभुजम्॥ **14**॥

महानखं महापादं कालाग्निसदृशाननम्।
कर्णान्तकृतविस्तारवदनं चातिभीषणम्॥ **15**॥

कृत्वेत्थं नारसिंहं तु ययौ विष्णुस्त्रिविक्रमः।
नरसिंहः स्तम्भमध्यान् निर्गत्य प्रणनाद च॥ **16**॥

निनादश्रवणाद्दैत्या नरसिंहमवेष्टयन्।
तान् हत्वा सकलांस्तत्र स्वपौरुषपराक्रमात्॥ **17**॥

बभञ्ज च सभां दिव्यां हिरण्यकशिपोर्नृप।
वारयामासुरभ्येत्य नरसिंहं महाभटाः॥ **18**॥

ते तु राजन् क्षणादेव नरसिंहेन वै हताः।
ततः शस्त्राणि वर्षन्ति नरसिंहे प्रतापिनि॥ **19**॥

स तु क्षणेन भगवान् हत्वा तद्बलमोजसा।
ननाद च महानादं दिशः शब्देन पूरयन्॥ **20**॥

तान्मृतानपि विज्ञाय पुनरन्यान्महासुरः।
अष्टाशीतिसहस्राणि हेतिहस्तान् समादिशत्॥ **21**॥

तेऽप्यागत्य च तं देवं रुरुधुः सर्वतोदिशम्।
हत्वा तानखिलान् युद्धे युध्यमानो ननाद सः॥ **22**॥

पुनः सभां बभञ्जासौ हिरण्यकशिपोः शुभाम्।
तान् हतानपि विज्ञाय क्रोधसंरक्तलोचनः॥ **23**॥

ततो हिरण्यकशिपुर्निश्चक्राम महाबलः।
उवाच च महीपाल दानवान् बलदर्पितान्॥ **24**॥

हन्यतां हन्यतामेष गृह्यतां गृह्यतामयम्।
इत्येवं वदतस्तस्य प्रमुखे तु महासुरान्॥ **25**॥

युध्यमानान् रणे हत्वा नरसिंहो ननाद च।
ततोऽतिदुद्रुवुर्दैत्या हतशेषा दिशो दश॥ **26**॥

तावद्धता युध्यमाना दैत्याः कोटिसहस्रशः।
नरसिंहेन यावच्च नभोभागं गतो रविः॥ **27**॥

शस्त्रास्त्रवर्षचतुरं हिरण्यकशिपुं जवात्।
प्रगृह्य तु बलाद्राजन् नरसिंहो महाबलः॥ **28**॥

संध्याकाले गृहद्वारि स्थित्वोरौ स्थाप्य तं रिपुम्।
वज्रतुल्यमहोरस्कं हिरण्यकशिपुं रुषा।
नखैः किसलयमिव दारयत्याह सोऽसुरः॥ **29**॥

यत्राखण्डलदन्तिदन्तमुसलान्याखण्डितान्याहवे
धारा यत्र पिनाकपाणिपरशोराकुण्ठतामागमत्।
तन्मे तावदुरो नृसिंहकरजैर्व्यादीर्यते साम्प्रतं
दैवे दुर्जनतां गते तृणमपि प्रायोऽप्यवज्ञायते॥ **30** ॥

एवं वदति दैत्येन्द्रे ददार नरकेसरी।
हृदयं दैत्यराजस्य पद्मपत्रमिव द्विपः॥ **31** ॥

शकले द्वे तिरोभूते नखरन्ध्रे महात्मनः।
ततः क्व यातो दुष्टोऽसाविति देवोऽतिविस्मितः॥ **32** ॥

निरीक्ष्य सर्वतो राजन् वृथैतत्कर्म मेऽभवत्।
इति संचिन्त्य राजेन्द्र नरसिंहो महाबलः॥ **33** ॥

व्यधूनयत्करावुच्चैस्ततस्ते शकले नृप।
नखरन्ध्रान्निपतिते भूमौ रेणुसमे हरेः॥ **34** ॥

दृष्ट्वा व्यतीतसंरोषो जहास परमेश्वरः।
पुष्पवर्षं च वर्षन्तो नरसिंहस्य मूर्धनि॥ **35** ॥

देवाः सब्रह्मकाः सर्वे आगताः प्रीतिसंयुताः।
आगत्य पूजयामासुर्नरसिंहं परं प्रभुम्॥ **36** ॥

ब्रह्मा च दैत्यराजानं प्रह्लादमभिषेचयत्।
धर्मे रतिः समस्तानां जनानामभवत्तदा॥ **37** ॥

इन्द्रोऽपि सर्वदेवैस्तु हरिणा स्थापितो दिवि।
नरसिंहोऽपि भगवान् सर्वलोकहिताय वै॥ **38** ॥

श्रीशैलशिखरं प्राप्य विश्रुतः सुरपूजितः।
स्थितो भक्तहितार्थाय अभक्तानां क्षयाय च॥ **39** ॥

इत्येतन्नरसिंहस्य माहात्म्यं यः पठेन्नरः।
शृणोति वा नृपश्रेष्ठ मुच्यते सर्वपातकैः ॥ **40** ॥

नरो वा यदि वा नारी शृणोत्याख्यानमुत्तमम्।
वैधव्याद्दुःखशोकाच्च दुष्टसङ्गात्प्रमुच्यते ॥ **41** ॥

दुश्शीलोऽपि दुराचारो दुष्प्रजो दोषकर्मकृत्।
अधर्मिष्ठोऽनभोगी च शृण्वन् शुद्धो भवेन्नरः ॥ **42** ॥

हरिः सुरेशो नरलोकपूजितो
    हिताय लोकस्य चराचरस्य।
कृत्वा विरूपं च पुराऽऽत्ममायया
    हिरण्यकं दुःखकरं नखैश्छिनत् ॥ **43** ॥

॥ इति श्री नृसिंहावतारं समाप्तम् ॥